॥ श्रीः ॥

# ॥ लक्ष्मीनृसिम्हपञ्चरत्नम् ॥

त्वत्प्रभुजीव प्रियमिच्छसि चेन्नरहरिपूजां कुरु सततं
प्रतिबिम्बालङ्कृतिधृतिकुशलो बिम्बालङ्कृतिमातनुते ।
चेतोभृङ्ग भ्रमसि वृथा भवमरुभूमौ विरसायां
भज भज लक्ष्मीनरसिम्हानघपदसरसिजमकरन्दम् ॥ १

शुक्तौ रजतप्रतिभा जाता कटकाद्यर्थसमर्था चे-
दुःखमयी ते संसृतिरेषा निर्वृतिदाने निपुणा स्यात् ।
चेतोभृङ्ग भ्रमसि वृथा भवमरुभूमौ विरसायां
भज भज लक्ष्मीनरसिम्हानघपदसरसिजमकरन्दम् ॥ २

आकृतिसाम्याच्छाल्मलिकुसुमे स्थलनलिनत्वभ्रममकरोः
गन्धरसाविह किमु विद्येते विफलं भ्राम्यसि भृशविरसेऽस्मिन् ।
चेतोभृङ्ग भ्रमसि वृथा भवमरुभूमौ विरसायां
भज भज लक्ष्मीनरसिम्हानघपदसरसिजमकरन्दम् ॥ ३

स्रक्चन्दनवनितादीन् विषयान् सुखदान् मत्वा तत्र विहरसे
गन्धफलीसदृशा ननु तेऽमी भोगानन्तरदुःखकृतः स्युः ।
चेतोभृङ्ग भ्रमसि वृथा भवमरुभूमौ विरसायां
भज भज लक्ष्मीनरसिम्हानघपदसरसिजमकरन्दम् ॥ ४

तव हितमेकं वचनं वक्ष्ये शृणु सुखकामो यदि सततं
स्वप्ने दृष्टं सकलं हि मृषा जाग्रति च स्मर तद्वदिति ।
चेतोभृङ्ग भ्रमसि वृथा भवमरुभूमौ विरसायां
भज भज लक्ष्मीनरसिम्हानघपदसरसिजमकरन्दम् ॥ ५

इति श्रीमच्छङ्कराचार्यप्रणीतं लक्ष्मीनृसिम्हपञ्चरत्नं सम्पूर्णम् ॥